# Shri TandavasHanmukhastotram

# શ્રીતાણ્ડવષણ્મુખસ્તોત્રમ્

## Document Information

Text title : tANDavaShaNmukhastotram

File name : tANDavaShaNmukhastotram.itx

Category : subrahmanya

Location : doc_subrahmanya

Transliterated by : Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan Iyer, PSA Easwaran

Description-comments : siddhanAgArjunatantra

Latest update : June 15, 2017

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીતાણ્ડવષણ્મુખસ્તોત્રમ્

ૐ શ્રીગણેશાય નમઃ ॥

ૐ અસ્ય શ્રીતાણ્ડવગુહેશમહામન્ત્રસ્ય બ્રહ્મવિષ્ણુમહેશ્વરા ઋષયઃ।
ઋગ્યજુસ્સામાથર્વાણિ છન્દાંસિ ।
અત્યુગ્રરૂપી ભગવાન્ પરશમ્ભુપુત્રઃ તાણ્ડવાગુહેશો દેવતા ।
આં બીજં, હ્રીં શક્તિઃ । ક્રૌં કીલકમ્ ।
સર્વદુઃખભયનિવારણાર્થે જપે વિનિયોગઃ ॥

ૐ કુમારાય નમઃ આનન્દમહાષણ્મુખતાણ્ડવેશ્વરાય હૃદયાય નમઃ
યનમકુમાર બ્રહ્મોર્ધ્વતાણ્ડવેશ્વરાય શિરસે સ્વાહા
મકુમારાયન સંહારાતાણ્ડવકુમારાય શિખાયૈ વષટ્
મારાયનમકુ શિવજ્ઞાનબોધકતાણ્ડવેશ્વરાય કવચાય હુમ્
રાયનમકુમા નિત્યતૃપ્તસઙ્કુલ્પતાણ્ડવષણ્મુખાય નેત્રત્રયાય વૌષટ્
નમકુમારાય - સર્વાનન્દનિત્યતાણ્ડવતૃપ્તિયુતાય ષણ્મુખાય અસ્ત્રાય ફટ્
ભૂર્ભુવઃસુવરોમિતિ દિગ્બન્ધઃ ॥

ધ્યાનમ્ -
કોટિસૂર્યપ્રતીકાશં કોટિમન્મથરૂપિણમ્ ।
ચન્દ્રશીતાંશુવદ્ધ્યેયં સેનાન્યં પાર્વતીસુતમ્ ॥

સહસ્રશીર્ષકં દેવં સહસ્રાક્ષં ત્રિલોચનમ્ ।
દ્વિસહસ્રભુજં ચૈવ સર્વાયુધસમાયુતમ્ ॥

બ્રહ્મવિષ્ણુમહેશાનસર્વમણ્ડલવેષ્ટિતમ્ ।
ભક્તાનુકમ્પિનં દેવં નમામ્યાદિગુરું પરમ્ ॥

કરાલદંષ્ટ્રવદનમત્યુત્તમમહાવિભુમ્ ।
કાલરાત્રિસુતં વિષ્ણું પ્રલયાગ્નિસમપ્રભમ્ ॥

મયૂરેશં બ્રહ્મગુરું સ્વામિનાથં નમામ્યહમ્ ।

ચન્દ્રસૂર્યાગ્નિનેત્રં તં શિવપુત્રં નમામ્યહમ્ ॥

ગણેશસ્ય તુ વૈ પાર્શ્વે સદા સંસ્થિતયોગજમ્ ।
યોગાચાર્યં મહાપ્રભું ભિષગ્વર્યં નમામ્યહમ્ ॥

સર્વસંહારસઙ્કલ્પં પુનર્વૈ સૃષ્ટિરેવ હિ ।
પઞ્ચકૃત્યધરં દેવં મૂલનાથં નમામ્યહમ્ ॥

ધ્યાનપૂજોપરિ મન્ત્રઃ

ૐ નમો ભગવતે - શ્રીગુરુનાથષણ્મુખેશ્વરાય -
બ્રહ્મોર્ધ્વતાણ્ડવાય - સહસ્રકોટિશક્ત્યાયુધધરાય -
વ્યાઘ્રચર્મામ્બરધરાય - ઉગ્રત્રિનેત્રાય - હં ડં ઉં ફટ્ -
પૂર્વદ્વારં બધ્ધાં બન્ધિ - માં રક્ષ રક્ષ - મમ
શત્રૂન્સ્તમ્ભય સ્તમ્ભય - હં ઠં હું ફટ્ - નમો નમઃ
સ્વાહા -

ૐ રં નમો ભગવતે - મહાસેનાય -
વિષ્ણુતુલ્યપરાક્રમાય - અગ્નિપ્રળયમયૂરતાણ્ડવેશ્વરાય -
સહસ્રદિઙ્મુખાય - સહસ્રત્રિનેત્રાય -
શતકોટિકપાલમાલાલઙ્કૃતાય - શાર્દૂલચર્મામ્બરધરાય -
દ્વિસહસ્રકોટિખડ્ગખેટકકટકધરાય - માં રક્ષ રક્ષ -
મમ શત્રૂન્ જહિ જહિ - છિન્ધિ છિન્ધિ - ભીષય ભીષય હ્સ્રૌં -
આગચ્છ આગચ્છ - યં રં અગ્નિદ્વારં બન્ધય બન્ધય નમો
નમઃ સ્વાહા -

ૐ હં નમો ભગવતે - કુમારસ્વામિને - અગ્નિપુત્રાય -
ગણેશકનિષ્ઠાય - પ્રલયકાલતાણ્ડવાય - ઉગ્રનખાય -
ઉગ્રદંષ્ટ્રાય - ઉગ્રનેત્રાય - વજ્રદેહાય - વજ્રનખાય -
ઉગ્રમહાભયઙ્કરાય - ત્રિસહસ્રકોટિમુસલગદાધરાય - માં
રક્ષ રક્ષ - મમ શત્રૂન્ ભક્ષય ભક્ષય - હં યં યં
દક્ષિણદ્વારં બન્ધય બન્ધય - નમો નમઃ સ્વાહા -

ૐ નૃં નમો ભગવતે - મહાસ્કન્દાય -
પરમશિવસદાશિવપુત્રાય -
નિરૃતિતાણ્ડવેશ્વરાય - ક્રૂરદંષ્ટ્રાકરાળવદનાય -
યુગાન્તપ્રલયકાલપ્રચણ્ડોદ્દણ્ડોન્નતસ્વરૂપાય -

સહસ્રકોટિપરશુપાશહસ્તાય - ઘોરરુદ્રાટ્ટહાસાય -
શૂરપદ્મદૃષ્ટિનાશકાય - આવેશય આવેશય આકર્ષય આકર્ષય -
અપમૃત્યું નાશય નાશય - હં ઠં નિરૃતિદ્વારં બન્ધય
બન્ધય - નમો નમઃ સ્વાહા -

ૐ વં નમો ભગવતે વલ્લીશાય - દેવસેનાવલ્લભાય - બાહુલેયાય -
અમૃતતાણ્ડવેશ્વરાય - અમૃતકલશધરકરામ્બુજાય -
નવામ્બુદશ્યામલાય - શશાઙ્કકૃતશેખરાય -
તારકધ્વંસિને - દક્ષાધ્વરધ્વંસિને - દિગમ્બરસ્વરૂપાય -
શક્તિશૂલડમરુક-અગ્નિભાણ્ડપુષ્પબાણધરાય - હુઙ્કારનાથાય -
ઉરગમણિભૂષણાય - ૐ વં પશ્ચિમદ્વારં બન્ધય બન્ધય -
ૐ નમઃ સ્વાહા માં રક્ષ રક્ષ સ્વાહા -

ૐ ૐ મં યં નમો ભગવતે સરસ્વતીવલ્લભાય - કુક્કુટધ્વજાય -
શૈલવાસાય - પીઠાધિપરૂપિણે - પ્રચણ્ડતાણ્ડવાય -
ત્રિસહસ્રકોટિશક્તિખડ્ગખેટકધરાય - કાલરાત્રિસઞ્ચાર -
ભૂતપ્રેતપિશાચયક્ષરાક્ષસસંહારકારણાય - પરમન્ત્ર
પરયન્ત્ર પરતન્ત્ર વિચ્છેદનાય - વાયુદ્વારં બન્ધય બન્ધય
નમઃ સ્વાહા -

ૐ ઠં નમો ભગવતે - કુબેરતાણ્ડવરૂપિણે -
એકાદશરુદ્રાત્મકસ્વરૂપિણે - મહાભૈરવાય - શૂલગદાધરાય -
સહસ્રાકોટિસિંહવાહનાય - નિરાભાસાય - કાલમૃત્યુસંહારણાય -
અનવરતસંહારતાણ્ડવેશસ્વરૂપિણે - અરૂપાય - સ્વરૂપાય -
સચ્ચિદાનન્દવિગ્રહાય - આનન્દતાણ્ડવભૈરવાય - ૐ ઠં
ઉત્તરદ્વારં બન્ધય બન્ધય - ૐ નમઃ સ્વાહા માં રક્ષ રક્ષ
સ્વાહા -

ૐ ઇં નમો ભગવતે - ઈશાનતાણ્ડવરૂપાય -
મયૂરપ્રધાનવાહનાય - અજવાહનાય -
અગ્નિરૂપભયઙ્કરાય - દશસહસ્રકોટિસિંહવાહનાય -
દશસહસ્રકોટિશઙ્ખચક્રમુસલભિણ્ડિપાલચર્મપાત્રધરાય -
ચક્રેણ નિકૃન્તય નિકૃન્તય - મુસલેન મારય મારય -
ખડ્ગેન ભેદય ભેદય - કુઠરેણ છેદય છેદય -

ખટ્વાઙ્ગેન છેદય છેદય - હું ક્ષં કલ્યાણવીરભદ્રાવતારાય -
સહસ્રાકોટિબ્રહ્મકપાલમાલાધરાય - ઈશાનદ્વારં બન્ધય
બન્ધય - માં રક્ષ રક્ષ ૐ નમઃ સ્વાહા -

ૐ શં સૃં પ્રોં ઔં - ૐ નમઃ
પ્રલકાલાગ્નિરુદ્રાવતારતાણ્ડવેશ્વરાય -
સહસ્રકોટિનિર્વાણભૈરવપરિપાલનાય - આં અટ્ટહાસાય - મહાસેનાય -
નં શમ્ભુપુત્રાય - આદિશેષાવતારાય - પાતાલદ્વારં બન્ધય
સ્વાહા ।

ૐ ખં નમો ભગવતે - મહાકુમારાય -
ઊર્ધ્વતાણ્ડવાત્મકાય - ચેરતાણ્ડવાય -
ભૂતપ્રેતપિશાચયક્ષરાક્ષસયમદૂતશાકિનીડાકિનીસમસ્તદુર્ગાદિન્
બન્ધય બન્ધય -

ૐ હ્રીં હું ફટ્ - આત્માનં રક્ષ રક્ષ -
વજસિંહમુખદંષ્ટ્રાકરાલવદનતાણ્ડવેશ્વરાય -
સહસ્રકોટિભદ્રકાલિદેવતાત્રિસહસ્રકોટિરુદ્રાટ્ટહાસ-
નવવીરવીરભદ્રમુખસેવિતાય -
ચતુષ્કોટિરામલક્ષ્મણભરતશત્રુઘ્નહનુમત્સેવિતાય -
સપ્તસહસ્રકોટિદુર્ગાદેવતાપરિવારસેવિતાય -
શ્રીશરભસાલ્વશ્રીશૂલિન્યાવરણાય - કુમારસ્વામિને -
અત્યન્તસૌમ્યશીતલસ્વરૂપાય -અવાઙ્મનસગોચરાય -
અગણિતમહિમ્ને - મમ દેહે પાદાદિકેશપર્યન્તં રક્ષ રક્ષ મમ
શત્રૂન્ ભક્ષય ભક્ષય - મહાયોગેસ્વરાય - હું ફટ્ સ્વાહા -
પૂનર્નમસ્તે નમસ્તે - શ્રીગુરુભ્યો નમઃ

મહાપાશુપતાસ્ત્રાદિસર્વાસ્ત્રમનુગર્ભિતમ્ ।
મહાદ્ભુતમિદં સ્તોત્રં પ્રદોષેષુ પઠેત્સદા ॥

ઇતિ સિદ્ધનાગાર્જુનતન્ત્રે શ્રીતાણ્ડવષણ્મુખસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded by Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com
Proofread by Sivakumar Thyagarajan Iyer, PSA Easwaran

*Shri TandavasHanmukhastotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*